# राष्ट्रियसंस्कृतविश्वविद्यालयः , तिरुपतिः

[संसदः अधिनियमेन प्रतिष्ठापितः केन्द्रीयविश्वविद्यालयः]

# संस्कृतसंवर्धनसकेन्द्रम्

Centre for Sanskrit Language Promotion

# वार्षिकप्रतिवेदनम्

2021 - 22



अध्यक्षः

## आचार्य वि.मुरलीधरशर्मा



संयोजकः

## आचार्य प्रह्लाद् रा.जोशी

# सदस्याः



परमेश्वरः



किरणभट्टः



शङ्करबेहरः



प्रीतिः

# संस्कृतविकासकेन्द्रम्

एकस्य संस्कृतविश्वविद्यालयस्य दायित्वं केवलं शास्त्राणां संरक्षणम् एव न अपि तु सामाजिकदायित्वमपि विद्यते । शास्त्राणां रक्षणेन सह संस्कृतभाषायाः प्रसारं प्रचारम् अपि कुर्यात् । अतः तादृशं किञ्चित् केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव **"संस्कृतविकासकेन्द्रम्"** ।

राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतिः **आचार्य वि.मुरलीधरशर्मवर्यः** **संस्कृतविकासकेन्द्रस्य** समुद्घाटनम् अकरोत् । एतस्मात् केन्द्रात् नागरेभ्यः बालेभ्यः सर्वेभ्यः संस्कृतभाषायाः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् पाठयन्ति ।

## संस्कृतविकासकेन्द्रस्य प्रधानकार्याणि एवं सन्ति -

- बालकेन्द्राणामयोजनम्।
- सम्भाषणशिबिराणामयोजनम्।
- गीताजयन्त्यादिपर्वणां निर्वहणम्।
- नुतनतया प्रविष्टानां भाषादक्षतायाः विकासः।
- अनुवर्तिकक्ष्यायाः निर्वहणम्।
- विशेषोपन्यासाः।

अस्मिन् शैक्षिकवर्षे करोनासङ्क्रमणात् सर्वत्र गृहबन्धनमास्ति इत्यतः वयमपि विद्यालयं गत्वा न अपाठयन् । सर्वविधकार्याणि अन्तर्जालमाध्यमेन अकुर्वन् । विशिष्य बालेभ्यः बालगोकुलम्, नागरिकेभ्यः सम्भाशणशिबिरम्, भगवद्गीतकक्ष्या , षाण्मासिकपाठ्यक्रमस्य पाठनम्, इत्यादयः कार्यक्रमाः समचालयन् ।

# बालगोकुलम् [Online]

अद्यतने आधुनिकयुगे संस्कृतिः क्षीयमाणा वर्तते । तस्याः पुनरुज्जीवनाय समर्थाः अद्यतनाः बालाः एव । अद्यतनबालाः एव नवभारतस्य निर्मातारः इति मन्वानाः तिरुपतिस्थस्य राष्ट्रियसंस्कृतविश्वविद्यालयस्य कुलपतिः **आचार्यः वि.मुरलीधरशर्मवर्यः** **बालगोकुलम्** इत्याख्यायाः अन्तर्जालकक्ष्यायाः आरम्भम् अकरोत् । बालेभ्य जीवनस्य मूल्यं, भारतस्य संस्कृतेः विषये परिकल्पनाय एनं सङ्कल्पम् अकरोत् ।

करोनासङ्क्रमणस्य कारणेन सर्वत्र गृहबन्धनम् अवर्तत अतः विद्यालयं गत्वा पाठयितुम् अशक्नुवन् । तदर्थं अन्तर्जालमाध्यमेन विशिष्य बालान् पाठयितुं योजनाम् अकरोत् कुलपतिः। तस्मिन् एव सम्द्भे बालेभ्यः विद्यालयः नासन् पुनः सर्वेऽपि गृहे एव अवर्तन्त ।एतत् सर्वं मानसि निधाय एतस्याः कक्ष्यायाः आरम्भम् अकरोत् ।

पञ्चभ्यः वर्षेभ्यः केवलं तिरुपतिस्थ बालान् एव संस्कृतम् अपाठयत् विश्वविद्यालयः । "पाठयेम संस्कृतं जगति सर्वमानवान्" इति वाक्यानुगुणं कालानुगुणं च प्रपञ्चे विद्यमान् सर्वान् संस्कृतानुरागीन् पाठयामः इति सदुद्देश्येन 2020 तमे शैक्षिकवर्षे जुलैमासे 15 दिनाङ्के आचार्यस्य विरिवेण्टि मुरलीधरशर्मवर्यस्य करकमलाभ्यां बालगोकुलस्य आरम्भः अभवत् । एषः द्विवर्षात्मकः पाठ्यक्रमः विद्यते ।

2020-21 शैक्षिकवर्षस्य प्रभावेन कक्ष्ययां छात्राणां प्रगतिं दृष्ट्वा एतस्य जनप्रियता इतोऽपि अधिका भवत् । अभिभावकानां प्रार्थनया विश्वविद्यालयः बालगोकुलस्य द्वितियवर्षस्य अपि आरम्भम् अकरोत् । ये प्रथमवर्षे उत्तिर्णतां प्राप्तवन्तः तेभ्यः द्वितियवर्षे प्रवेष्टुमनुमतिम् अददात् । अस्मात् वर्षात् बालगोकुलस्य स्तरद्वयं विद्यते ।

बालगोकुले न केवलं भारतीयाः छात्राः पठन्ति अपि तु 21 देशेभ्यः छात्राः पठन्ति इति हर्षस्य विषयः । भारतदेशस्य विभिन्नेभ्यः प्रान्तेभ्यः छात्राः वर्तन्ते । एवं प्रथमवर्षस्य सफलतां दृष्ट्वा अस्मिन् 2021-22 शैक्षिकवर्षे दितीयस्तरस्यापि आरम्भम् अकरोत् ।अस्मिन् शैक्षिकवर्षे आहत्य बालगोकुले 253 छात्राः अन्तर्जालमाध्यमेन सम्भाषणसंस्कृतं पठन्ति ।

बालगोकुलस्य प्रथमस्तरस्य विवरणम् एवम् अस्ति । यथा –

| अनु.क्र. | देशस्य नाम | छात्रसङ्ख्या | देशः |
|---|---|---|---|
| 1. | भारतीयाः | 110 | 1 |
| 2. | वैदेशिकाः | 75 | 21 |
| | Total | 185 | 22 |

बालगोकुलस्य द्वितीयस्तरस्य विवरणम् एवम् अस्ति । यथा –

| अनु.क्र. | देशस्य नाम | छात्रसङ्ख्या | देशः |
|---|---|---|---|
| 1. | भारतीयाः | 43 | 1 |
| 2. | वैदेशिकाः | 25 | 09 |
| | Total | 68 | 10 |

**सम्पूर्णबालगोकुलस्य विवरणम् एवम् अस्ति । यथा –**

| | | |
|---|---|---|
| 1. | भारतीयाः | 153 |
| 2. | वैदेशिकाः | 100 |
| 3. | देशाः | 21 |

बालगोकुलकक्ष्या केवलं भारतीयानां भानुवासरे भवति । एवं वैदेशिकानां सोमवासरे प्रातः 4:30 वादने भवति । भारतीयच्छात्राणां गणत्रयं विद्यते । वैदेशिकानामेकः गणः वर्तते । भारतीयकालानुगुणं कक्ष्यायाः समयः एवं वर्तते ।

| अनु.क्र. | गणः | समयः |
|---|---|---|
| 1. | प्रथमः गणः | 10 to 11:30 am |
| 2. | द्वितीयः गणः | 3 to 4:30 pm |
| 3. | तृतीयः गणः | 6 to 7:30 pm |
| 4. | वैदेशिकानां गणः | 4:30 to 6 am |

बालगोकुले न केवलं संस्कृतसम्भाषणमेव पाठयन्ति अपि तु श्लोकान्, सङ्ख्याः, संस्कृतगीतानि, नित्यपञ्चाङ्गम् (मासानां, नक्षत्राणां नामानि इत्यादिनि), भजनानि, भाषाक्रीडाः, कथाः, सम्भाषणम् एवं विभिन्नान् विषयान् पाठयन्ति । कक्ष्यायां विभिन्नोपकरणाम् (तन्त्रांशानां) उपयोकं कुर्वन्ति ।


जुलैमासस्य 15 दिनाङ्कतः आरभ्य मेमासस्य 30 दिनाङ्कपर्यन्तं 50 कक्ष्याः भविष्यन्ति । प्रतिमासं पितृभ्यां सह समावेशः एवं छात्राणां परीक्षा अपि भविष्यन्ति । समेषां छात्राणां स्तरद्वये अपि परीक्षा भविष्यति । अत्र पाठनार्थं संस्कृतभारत्याः बालकेन्द्रम् इत्यस्य पाठ्यक्रमस्य अनुसरणम् अकुर्महि ।

बालगोकुलस्य प्रथमवर्षस्य जयदीपनामकः छात्रः Indian Book of Record इत्यस्याः संस्थायाः पुरस्कारमपि प्राप्नोत् । एषा संस्था भारतसर्वकारस्य वर्तते । एषः बालः England देशे वसति । असौ शीघ्रं गणेशपञ्चरत्नम् इति स्तोत्रं वदति इति पुरस्कारम् अददुः । एवमेव इतोऽपि पञ्चशः बालाः सद्यः एव प्राप्स्यन्ति इति निश्चप्रजम् ।




संस्कृतविकासकेन्द्रस्य सदस्य किरणभट्टः अपि Indian Book of Record इत्यस्मात् पुरस्कारं प्राप्नोत् । एतस्य SVBC वाहिन्यां प्रसारितं संस्कृतं पठामः कार्यक्रमम् एवं समाजसेवाम् च अवलोक्य पुरस्कारम् अददुः ।






बालगोकुलस्य द्वितीयवर्षस्य लोकेशनामकः छात्रः Indian Book of Record इत्यस्याः संस्थायाः पुरस्कारं प्राप्नोत् । एषा संस्था भारतसर्वकारस्य वर्तते । एषः बालः भरतदेशे वसति । असौ वयसः अनुगुणम् अत्यधिकान् श्लोकान् (205) वदति इति पुरस्कारम् अददात् । लोकेशः एतान् श्लोकान् बालगोकुलकक्ष्यातः अपठत् । एवमेव इतोऽपि पञ्चशः बालाः सद्यः एव प्राप्स्यन्ति इति निश्चप्रजम् ।




# षाण्मासिकपाठ्यक्रमे पाठनम्

करोनासङ्क्रमणकाणे विश्वविद्यालयः अन्तर्जालपाठ्यक्रमस्य आरम्भम् अकृषत । अस्मिन् त्रिंशधिकाः पाठ्यक्रमाः वर्तन्ते । तेषु अन्यतः जनप्रसिद्धश्च Certificate Program in Functional Sanskrit पाठ्यक्रमः । अस्मिन् पाठ्यक्रमे पञ्चाशतधिकशतं छात्राः वर्तन्ते । एतस्य पाठनार्थं विकासकेन्द्रस्य सदस्याः सहय्यम् अकुर्मन् । भारतीयानं छात्राणां गणद्वयम्, वैदेशिकानामेकः गणः विद्यते । तेभ्यः संस्कृतसम्भाशणशिबिरम्, सामान्यव्याकरणस्य पाठान् एवमित्यादीन् विषयान् पाठयन्ति सदस्याः ।

एतेन प्रभाविताः जनाः अग्रिमे पाठ्यक्रमे प्राविशन् । पुनः केचन छात्राः विभिन्नपाठ्यक्रमे प्राविशन् एवं विश्वविद्यालये प्रक्-शास्त्री इत्यादिषु कक्ष्यासु प्राविशन् ।

## अन्तर्जालकक्ष्यायाः कानिचन चित्राणि














ID: 606 874 2379
32
Papia Pathak


Sriram saran bJ 17
k.n.harini bg16
BG 42 V DARSHITA
BG27 Murari Pus...
Bg13 durga Srini...
shejal Nayak
राष्ट्रियसंस्कृतविश्ववि...
ASWIN Mogallap...
Saavi_Roll No 30
BG40 TRIDEV
BG_1Srivishnu/BG...
BG-14 gnana 4-A...
Sarvasiddanta(B...
BG05_Sriram
Jaideep, BG- 15
Prajana
BG- Havish
BG 20 K.Sadhana
Meenakshi BG09
KATTA MEGHANA
Reya Das 29
Aashritha BG02
BG_23_Madhavan
Sarvagnya BG33
T Subrahmanya ...


Chandrasekharan Venk...
NATIONAL SANSKRIT UNI...
Prisha ,Tampa, Florida
Adithi
Kailash Karthik Malyala
El Morya
shourya s
bhuvan
Riya C.
sahasrashree
samvith
Suresh Aluri
Unmute
swami
Saranayaki
Siva Lalasa
Achyutha
Ram Petluri
Akshaj's iPad
Raghavi Janaswamy


L2BG28 Shriya N Boggaram "...
Bhuvan Varenya
L2BG32 Srinath Dhilip
Janani L2BG13
AASHIKA L2BG04
L2BG29 Soumyajit Bhattachary...
Sriranga Bhashyam
राष्ट्रियसंस्कृतविश्वविद्यालयः तिरुपतिः
L2BG09-DEVAPRASAD
AKSHARA bg 12
L2BG16 Keerthi
Visisht penumudi
L2BG41 - Viha Bhat
Samarth
L2BG38 Veda
Aadya Joshi
Mahi Sree K L2BG14
DWIJESH CHOUDHURY
Ask to Unmute
L2BG01 Kandhadai Ashwathsa...
L2BG19 Lokesh
Vidushi 40
Vani Verma
L2BG05 A.Amrutha valli chan...
L2 BG 35 Swastik Bhat Ubarad...
L2BG27 - Sanvika D






# జయదీప్‌కు 'ఇండియన్ బుక్' అవార్డు

తిరుపతి(విద్య), జనవరి 28: తిరుపతికి చెందిన లక్ష్మి, విశ్వనాథ్ దంపతుల కుమారుడు జయదీప్(6)కు ఇండియన్ బుక్ ఆఫ్ అవార్డు లభించింది. అతి చిన్న వయస్సులో సంస్కృతంలోని గణేష్ పంచరత్నాన్ని 5.02నిమిషాల వ్యవధిలో పూర్తిచేసినందుకు ఆ సంస్థ ఈనెల 25న అవార్డుకు ఎంపిక చేసింది. ఈ చిన్నారి తిరుపతిలోని జాతీయ సంస్కృత వర్సిటీ ఆధ్వర్యంలో నడుస్తున్న బాలగోకులం కేంద్రంలో ఏడాదిగా ఆన్‌లైన్ లో శిక్షణ తీసుకుంటున్నాడు. జయదీప్ తల్లిదండ్రులు ఉద్యోగరీత్యా యూకేలో పనిచేస్తున్నారు. ఆ చిన్నారి కూడా తల్లిదండ్రుల వద్ద ఉంటూ ఈ అవార్డుకు దరఖాస్తు చేశారని కేంద్రం నిర్వాహకులు తెలిపారు.